# संस्कृतवार्ता:

दिनाङ्क : 01/06/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र मोदी म्यांमायाः राष्ट्रपतिः ऊ मिन आऊं लाइन् च नव-दिल्ल्यां द्विपक्षीयोपवेशनं कृतवन्तौ। उभयोः मध्ये ऐतिहासिक-सभ्यतागत- सम्बन्धान् सुदढीकर्तुं वार्ता अभवत् ।
- भारत-ओमान-व्यापकार्थिक-सहभागितासन्धिः सी.ई.पी.ए. इति अद्य क्रियान्वितः अभवत्। अनेन भारतीय-निर्यातकेभ्यः ओमाने प्रतिशतम् अष्टनवतिमितम् विपणौ शुल्क-मुक्त-कार्यानुमतिः भविष्यति।
- प्रधानमन्त्री स्वनिधि योजनाया: षड्वर्षपूर्तौ प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् अनया योजनया पथ व्यवसायिभ्य: प्रगते: नूतनावसरा: प्रदत्ता:।
- पश्चिम-बंगालस्य मुख्यमंत्री शुभेंदु-अधिकारी अद्य मंत्रिमण्डलस्य विस्तारं विधाय पञ्चत्रिंशत् नूनत-मंत्रिभ्य: मन्त्रिमण्डले स्थानम् अयच्छत् ।
- हांगकांग नगरे आयोजितां द्वाविंशतिः तमायाम् एशियामहाद्वीपीयायाम् अंडर-20 एथलेटिक्स चैंपियनशिप इति स्पर्धामालिकायां भारतेन दश स्वर्णपदकानि समेत्य नवदश पदकानि विजितानि।

---------------------------------------

<u>प्रधानमन्त्री म्यांमा राष्ट्रपतिः</u>

प्रधानमन्त्री नरेन्द्र मोदी म्यांमायाः राष्ट्रपतिः ऊ मिन आऊं लाइन् च अद्य नव-दिल्ल्यां द्विपक्षीयोपवेशनं कृतवन्तौ। उभयोः मध्ये ऐतिहासिक-सभ्यतागत- सम्बन्धान् इतोपि सुदढीकर्तुं वार्ता अभवत् । संवादे म्यांमा-भारतदेशयोः मिथः सुरक्षां सम्पर्कं च समेत्य देशद्वयोः सन्बन्धानां समेपि पक्षाः चर्चिताः। उपवेशनस्य अनन्तरं विदेशसचिव: विक्रम मिसरी अवोचत् यत् देश द्वयेन विदेश-व्यवहार-विकास-शिक्षा, स्वास्थ्यादि विषयेषु कार्याचरणाय साहमत्यं प्रकटितम्। अस्माकं

वार्ताहरेण सूचितं यत् म्यांमा-देशस्य राष्ट्रपतिः अद्य सायं राष्ट्रपति-भवने राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया सह मेलनं करिष्यति।

----------------------------------------

## भारत - ओमान

भारत-ओमान-व्यापकार्थिक-सहभागितासन्धिः सी.ई.पी.ए. इति अद्य क्रियान्वितः अभवत् । वाणिज्योद्योग-मन्त्री पीयूष-गोयलः अवोचत् यत् अयं सन्धिः देशद्वयस्य आर्थिक-रणनीतिक-सम्बन्धान् द्रढयिष्यति। एकस्मिन् राष्ट्रिय-दैनिक-पत्रे प्रकाशिते लेखे श्री-गोयलः अवोचत् यत् अयं सन्धिः नूतनापणम् उद्घाटयिष्यति। अनेन निर्याते वृद्धिः भविष्यति निवेशः अपि वृद्धिं यास्यति। व्यापकार्थिक-सहभागिता-सन्धेः अन्तर्गतं भारतीय-निर्यातकेभ्यः ओमाने उत्पाद-समूहेषु विपणौ प्रतिशतम् अष्टनवतिमिता शुल्क-मुक्तकार्यानुमतिः भविष्यति। श्रीगोयलेन उक्तं यत् अनेन आजीविकासंवर्धनाय विद्यार्थिभ्यः श्रमिकेभ्यः महिलाभ्यः कृषकेभ्यः मत्स्यजीविभ्यः सूक्ष्मलघुमध्यमोद्यमेभ्यः च महत्त्वपूर्ण-रूपेण लाभो भविष्यति।

----------------------------------------

## पीएम-स्वनिधि:

प्रधानमन्त्री स्वनिधि योजनाया: षड्वर्षपूर्तौ प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् अनया योजनया पथ व्यवसायिभ्य: प्रगते: नूतनावसरा: प्रदत्ता:। श्रीमोदी अस्या: योजनाया: प्रशंसां कृत्वा अवदत् यत् पीएम स्वनिधि योजनाया प्रतिभूतिं बिना ऋणप्रदानम्, वित्तीय समावेशनं अपि च विकास्य नवीन-अवसरा: प्रदत्ता: येन लक्षश: पथविक्रेतृ-जनानां जीवने उन्नति: जाता।

----------------------------------------

## पश्चिम बंगाल

पश्चिम-बंगालस्य मुख्यमंत्री शुभेंदु-अधिकारी अद्य मंत्रिमण्डलस्य विस्तारं अकरोत्। राज्यपाल: आर. एन. रवि: कोलकाताया: लोकभवने आयोजिते समारोहे पञ्चत्रिंशत् नूनत-मंत्रिभ्य: पदस्य गोपनीयताया: च शपथग्रहणं कारितवान्। समारोहे मुख्यमुंत्री वर्येण सह अन्य वरिष्ठनेतार:

अपि उपस्थिता: आसन्। नवनियुक्त-मंत्रिभ्य: विभागानां आवंटनं अनन्तरं भविष्यति । शपथग्रहण समारोहे स्वपनदास गुप्ता, अर्जुनसिंह:, तापसराय:, शकरघोष: च शपथवचनं स्वीकृतवन्त: ।

---------------------------------------

## भारत-ऑस्ट्रेलिया उपवेशनम्

भारत-ऑस्ट्रेलिया- देशयों: रक्षामंत्रिणो: द्वितीय-संवादोपवेशनम् नवदिल्ल्याम् अभवत्। रक्षामंत्री राजनाथसिंह: अथ च ऑस्ट्रेलियादेशस्य उपप्रधानमन्त्री रक्षामंत्रिश्च रिचर्ड-मार्ल्स: उपवेशनस्य अध्यक्षतां कृतवन्तौ। श्रीसिंहेन प्रोक्तम् यत् उपवेशनावधौ भारत-ऑस्ट्रेलिया-देशयोर्मध्ये सुरक्षा-संबंध: सुदृढ: अभवत्। श्रीमार्ल्स अवादीत् यत् ऑस्ट्रेलिया भारत देशौ रक्षा-सहभागितां सुदृढ: अकुरुताम्। देश द्वयं सामुद्रिक-क्षेत्रे मिलित्वा कार्यं करिष्यत:। वार्तायां द्विपक्षीय-रक्षा-सहयोग-विषये प्रगति: समीक्षिता। यया सहभागिताया: नूतन-मार्गस्य अन्वेषणं भविष्यति।

---------------------------------------

## जलशिक्त:

जलशक्तिमन्त्रि सी-आर-पाटिल: विज्ञानप्रौद्योगिकी मन्त्री जितेन्द्र सिंह च अद्य राजधान्यां नवदिल्ल्यां जलानुसंन्धानविकास सम्बद्धां कार्यशालां उद्घाटितवन्तौ । अत्रावसरे श्री पाटिल: अवदत् यत् अस्यां कार्यशालायां जलसङ्कटस्य समाधानेषु व्यापक विचार-विमर्शो विधीयते। अिस्मन् अवसरे जलशक्ति मन्त्रालयेन इसरो इत्यनेन च जलसंसाधनानाम् आकलनाय प्रबन्धनाय च उपग्रहाधारितानुप्रयोगम् उन्नत प्रौद्योगिकीं च द्रढयितुं सन्धि: हस्ताक्षरित: ।

---------------------------------------

## व्यावसायिक एल.पी.जी.

व्यावसायिक-प्रतिष्ठानेषु प्रयुज्यमानस्य नवदश किलोग्राम-भारमितस्य एल.पी.जी. इति वातिभाण्डस्य मूल्ये वृद्धिः सञ्जाता। परं गृहेषु प्रयुज्यमानस्य एल.पी.जी. इति वातिभाण्डस्य मूल्ये परिवर्तनं नैव कृतम्। अवधेयम् यत् वैश्विक-परिदृश्ये तैलमूल्येषु अस्थिरता कारणेन इयं

वृद्धिः जाता। पश्चिमेशियायाम् अमरीका-ईरानयोः गतिरोधः अपि अपरं मूल्यवृद्धि- कारणं वर्तते।

-----------------------------------------

## वस्तु सेवाकर:

वस्तु-सेवाकरस्य संकलसंग्रह: विगतमासे त्रि-दशलव द्वि प्रतिशतं संवर्ध्य एकलक्ष्य चतुर्नवतिसहस्रकोटि –रुप्याधिक: अभवत्। विगत वर्षे मई-मासे संग्रह: एकलक्ष-अष्टाशीतिसहस्र कोटिरुप्यकाणि असीत्। गतमासे केन्द्रीय-वस्तु-सेवा-करस्य सकलसंग्रह: सप्तत्रिंशत् सहस्र-सप्त-नवत्याधिक त्रिशतम् कोटि-रुप्यकाणि अपि च राज्य-वस्तु-सेवाकरस्य सकल-संग्रह: पञ्च-चत्वारिंशत्-सहस्र-त्रि-चत्वारिंशत्यधिक-शतम् कोटि-रुप्यकाणि आसीत्। एकीकृत-वस्तु-सेवा-करस्य संग्रह: एकपञ्चाशत् सहस्र नवत्यधिक नवशतम् कोटि रुप्यकाणि आसीत्।

-----------------------------------------

## सर्वोच्चन्यायालय

सर्वोच्च न्यायालये पञ्च न्यायाधीशानां नियुक्ति: कृता। अनेन सहैव मुख्य न्यायाधीशं समेत्य न्यायाधीशानां सङ्ख्या सप्तत्रिंशत् संवृत्ता। विधि-न्यायमन्त्री अर्जुन-राम-मेघवाल: सामाजिक-संचार-पटले अवोचत् यत् राष्ट्रपतिना मुख्य-न्यायाधीशस्य परामर्शानन्तरं सर्वोच्च-न्यायालये पञ्च नूतन न्यायाधीशानां नियुक्ति: कृता। अवधेयं यत् केन्द्र-प्रशासनेन विगते मासे एकम् अध्यादेशं प्रस्तूय विधौ संशोधनं कृतमासीत्।

-----------------------------------------

## एथलेटिक्स्

हांगकांग नगरे आयोजितां द्वाविंशतिः तमायाम् एशियामहाद्वीपीयायाम् अंडर-20 एथलेटिक्स चैंपियनशिप इति स्पर्धामालिकायां भारतेन दश स्वर्णपदकानि पञ्चरजतपदानि चत्वारि कांस्यपदकानि समेत्य नवदश पदकानि वजितानि। पदक- तालिकायां भारतेन द्वितीय-स्थानं प्राप्तम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना द्वाविंशतिः तमायाम् एशियामहाद्वीपीयायाम् अंडर-20

एथलेटिक्स चैंपियनशिप इति स्पर्धामालिकायां दश स्वर्णपदकानि समेत्य नवदश पदकानि प्राप्तवद्भ्यः भारतीयदलेभ्यः वर्धापनानि प्रदत्तानि ।

॥ इति वार्ता: ॥